CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 772

Title Kālapaiixā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 772 Subject: Dharmsastra

Title: Kulaparixeत

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.5" by 5.3" Extent: 17 foll.

Language: Sanskrit. Script: Devanagari

Remarks: ———

श्रीरामचंद्रायनमः॥श्रीगणेशायनमः॥श्रीदेव्युवाच॥देवदेवमहादेवकृपांकृत्वाममोपरि॥सर्वसि
द्धिकरंज्ञानंकथयस्वममप्रभो॥१॥कथंब्रह्मांडमुत्पन्नंकथंवापरिवर्त्तते॥कथंविलीयतेदेव
वदब्रह्मांडनिर्णयं॥२॥ईश्वरोवाच॥तत्वाद्ब्रह्मांडमुत्पन्नंतत्वेनपरिवर्त्तते॥तत्वेप्रलीय
तेदेवितत्वाद्ब्रह्मांडनिर्णयः॥३॥श्रीदेव्युवाच॥तत्वमेवपरंमूलंनिश्चितंतत्ववादिभिः
॥तत्वस्वरूपंकिंदेवतत्वमेवप्रकाशय॥४॥ईश्वरउवाच॥निरंजनोनिराकारएको
देवोमहेश्वरः॥तस्मादाकाशमुत्पन्नमाकाशाद्वायुसंभवः॥५॥वायोस्तेजस्ततश्चापस्त त
तःपृथ्वीसमुद्भवा॥एतानिपंचतत्वानिविस्तीर्णानिचपंचधा॥६॥तेभ्योब्रह्मांडमु
त्पन्नंतैरेवपरिवर्त्तते॥विलीयतेचतत्रैवतत्रैवरमतेपुनः॥७॥पंचतत्वमयेदेहेपंचत
त्वानिसुंदरि॥सूक्ष्मरूपेणवर्त्तंतेज्ञायंतेतेचयोगिभिः॥८॥अतःपरंप्रवक्ष्यामिशरी
रस्यस्वरोदयं॥हंसचारस्वरूपेणभवेज्ज्ञानंत्रिकालजं॥९॥गुह्याद्गुह्यतरंसारमुपका
रप्रकाशनं॥इदंस्वरोदयंज्ञानंज्ञानिनांमस्तकेमणिः॥१०॥सूक्ष्मात्सूक्ष्मतरंज्ञानंसुबो
१

धंसत्यमप्ययं॥आश्चर्यंनास्तिकेलोकेआधारस्त्वास्तिकेजने॥११॥अथशिष्यलक्षणं॥
शांतेशुद्धेसदाचारेगुरुभक्तैकमानसे॥दृढचित्तेकृतज्ञेचदेयंचैवस्वरोदयं॥१२॥
दुष्टेचदुर्जनेक्रुद्धेअसत्येगुरुतल्पगे॥हीनसत्वेदुराचारेस्वरज्ञानंनदीयते॥१३॥
शृणुत्वंकथितंदेविदेहस्थंज्ञानमुत्तमं॥येनविज्ञातमात्रेणसर्वज्ञत्वंप्रपद्यते॥१
४॥स्वरेवेदाश्चशास्त्राणिस्वरेगांधर्वमुत्तमं॥स्वरेचसर्वत्रैलोक्यंस्वरमात्मस्वरूप
कं॥१५॥स्वरहीनंचदैवज्ञंनाथहीनंयथागृहं॥शास्त्रहीनंचयद्वक्त्रंशिरोहीनं
चयद्वपुः॥१६॥नाडीभेदंतथाप्राणतत्वभेदंतथैवच॥सुषुम्नामिश्रभेदंचयोजा
नातिसमुक्तिभाक्॥१७॥साकारेवानिराकारेशुभंवायुबलेकृते॥कथयंतिशुभंकि
चित्स्वरज्ञानंवरानने॥१८॥ब्रह्मांडखंडपिंडाद्यांस्वरेणैवविनिर्मिताः॥सृष्टिसंहा
रकर्त्ताचस्वरःसाक्षान्महेश्वरः॥१९॥स्वरज्ञाना त्परंगुह्यंस्वरज्ञानात्परंधनं॥स्वर
ज्ञानात्परंमित्रंनवादृष्टंनवाश्रुतं॥२०॥शत्रुंहन्यात्स्वरबलेतथामित्रसमागमः

स्व० २

लक्ष्मीप्राप्तिस्वरवले कीर्तिः स्वरवले सुखं ॥१९॥ कंन्याप्तिः स्वरवले स्वरतो राजदर्श
नं ॥ स्वरेण देवतासिद्धिः स्वरवले क्षितिपो वशः ॥२०॥ स्वरेण गम्यते देशो भोज्यं स्वर
वले तथा ॥ लघुदीर्घं स्वरवले मलं चैव निवारयेत् ॥२१॥ सर्वशास्त्रपुराणादि स्मृ
ति वेदांगपूर्वकं ॥ स्वरज्ञानात्परं तत्त्वं नास्ति किंचिद्वरानने ॥२२॥ नामरूपादिकाः स
र्वे मिथ्या सर्वेषु विभ्रमः ॥ अज्ञानमोहिता मूढा यावत्तत्त्वं न विद्यते ॥२३॥ इदं स्वरो
दयं शास्त्रं सर्वशास्त्रोत्तमोत्तमं ॥ आत्मघटप्रकाशार्थं प्रदीपकलिकोपमं ॥२
४॥ यस्मै कस्मै न वक्तव्यं प्रश्नमात्रस्य हेतवे ॥ तस्मादेतत्स्वयं ज्ञेयं आत्मनैवात्मना
त्मनि ॥२५॥ न तिथिर्न च नक्षत्रं न वारो ग्रहदेवता ॥ न च विष्टिर्व्यतीपातो वैधृत्याद्यास्त
थैव च ॥२६॥ कुयोगो नास्ति देवेशि भवति न कदाचन ॥ प्राप्ते स्वरवले युक्ते सर्वमेव शु
भं फलं ॥२७॥ देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः ॥ ज्ञातव्याश्च बुधैर्नि
त्यं देहज्ञानस्य हेतवे ॥२८॥ नाभिस्थानकंदोर्ध्वमंकुरादेव निर्गताः ॥ द्विसप्त

शि

व

रोद० २

तिसहस्राणि देहमध्ये व्यवस्थिताः ॥२९॥ कुंडली स्थाने नाडी तु भुजंगाकारशायिनी ॥ ततो दशो
र्ध्वगा नाड्यो दशैवाधः प्रतिष्ठिताः ॥३०॥ द्वे द्वे तिर्यग्गते नाड्यौ चतुर्विंशतिसंख्यया ॥ प्रधाना
दश नाड्यस्तु दश वायुप्रवाहकाः ॥३१॥ तिर्यगूर्ध्वं तथा वायुर्देहमध्ये समन्विताः ॥ चक्रवत्सं
स्थिता देहे सर्वे प्राणसमाश्रिताः ॥३२॥ तासां मध्ये दश श्रेष्ठा दशानां तिस्र उत्तमाः ॥ इडा च
पिंगला चैव सुषुम्ना च तृतीयका ॥३३॥ गांधारी हस्तिनी जिह्वा पूषा चैव यशस्विनी
॥ अलंबुषा कुहूश्चैव शंखिनी दशमी तथा ॥३४॥ इडा वामे स्थिता भागे दक्षिणे पिं
गला तथा ॥ सुषुम्ना मध्यदेशे तु गांधारी वामचक्षुषि ॥३५॥ दक्षिणे हस्तिजिह्वा च पूषा
कर्णे च दक्षिणे ॥ यशस्विनी वामकर्णे आनने चाप्यलंबुषा ॥३६॥ कुहूश्च लिंगदेशे तु मू
लस्थाने च शंखिनी ॥ एवं द्वारं समाश्रित्य तिष्ठंति दशनाडिकाः ॥३७॥ इडापिंगलासुषुम्नाः प्रा
णमार्गे समाश्रिताः ॥ एता वै दश नाड्यस्तु देहमध्ये व्यवस्थिताः ॥३८॥ नामानि नाडीकानां तु वाता
नां प्रवदाम्यहं ॥ प्राणोऽपानः समानश्च उदानो व्यान एव च ॥३९॥ नागः कूर्मोऽथ कृकलो देव

३ दत्तो धनंजयः ॥ ४२ ॥ हृदि प्राणो वसेन्नित्यमपानो गुह्यमंडले ॥ ४३ ॥ समानो नाभिदेशे तु उदानः कंठमध्य-
गः ॥ व्यानो व्यापि शरीरेषु प्रधाना दश वायवः ॥ ४४ ॥ प्राणाद्याः पंच विख्याता नागाद्याः पंच वायवः ॥ ते-
षामपि च पंचानां स्थानानि च वदाम्यहं ॥ ४५ ॥ उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः ॥
कृकलः क्षुत्कृते ज्ञेयो देवदत्तो विजृंभणे ॥ ४६ ॥ न जहाति मृतं चापि सर्वव्यापी धनंजयः ॥ एते नाडी-
षु सर्वासु भ्रमंते जीवरूपिणः ॥ ४७ ॥ प्रकटं प्राणसंचारं लक्षयेद्देहमध्यगं ॥ इडापिंगलासुषु-
म्णा च नाडीभिस्तिसृभिर्बुधः ॥ ४८ ॥ इडा वामे च विज्ञेया पिंगला दक्षिणे स्मृता ॥ इडा नाडी स्थि-
ता वामा ततो व्यस्ता च पिंगला ॥ ४९ ॥ इडायां संस्थितश्चंद्रः पिंगलायां च भास्करः ॥ सुषुम्णा
शंभुरूपेण शंभुर्हंसस्वरूपकः ॥ ४९ ॥ हकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशने ॥ हकारः शि-
वरूपेण सकारः शक्तिरुच्यते ॥ ५० ॥ शक्तिरूपस्थितश्चंद्रो वामनाडीप्रवाहकः ॥ दक्षनाडी-
प्रवाहश्च शंभुरूपो दिवाकरः ॥ ५१ ॥ श्वासे सकारसंस्थे च यद्दानं दीयते बुधैः ॥ तद्दानं जीवलो- ३
केस्मिन्कोटिकोटिगुणं भवेत् ॥ ५२ ॥ अनेन लक्षयेद्योगी चैकचित्तः समाहितः ॥ सर्वमेव वि-

न
जानीयान्मार्गवित्सूर्यचंद्रयोः ॥ ५३ ॥ ध्यायेत्तत्त्वं स्थिरे जीवे अस्थिरे न कदाचन ॥ इष्टसिद्धिर्भवेत्त-
स्य महालाभो जयस्तथा ॥ ५४ ॥ चंद्रसूर्यसमाभ्यासं ये कुर्वंति सदा नराः ॥ अतीतानागतज्ञानं तेषु
हस्तगतं सदा ॥ ५५ ॥ वामे चामृतरूपा स्याज्जगदाप्यायनं परं ॥ दक्षिणे चरभागेन जगदुत्पादये-
त्सदा ॥ ५६ ॥ मध्यमा भवति क्रूरा दुष्टा सर्वत्र कर्मसु ॥ सर्वत्र शुभकार्येषु वामा भवति सिद्धिदा ॥
५७ ॥ निर्गमे तु शुभा वामा प्रवेशे दक्षिणा शुभा ॥ चंद्रः समस्तु विज्ञेयो रविस्तु विषमः सदा ॥ ५
८ ॥ चंद्रः स्त्री पुरुषः सूर्यः चंद्रो गौरः सितो रविः ॥ चंद्रनाडीप्रवाहे च सौम्यकार्याणि कारयेत् ॥
५९ ॥ सूर्यनाडीप्रवाहेन रौद्रकर्माणि कारयेत् ॥ सुषुम्णायाः प्रवाहेन सिद्धिमुक्तिफलानि च
॥ ६० ॥ आदौ चंद्रः सिते पक्षे भास्करस्तु सितेतरे ॥ प्रतिपद्यो दिनान्याहुस्त्रीणि त्रीणि क्रमोद-
ये ॥ ६१ ॥ सार्धद्विघटिका ज्ञेया शुक्ले कृष्णे शशी रविः ॥ वहत्येकदिनेनैव यथा षष्टिघटिः क्रमात् ॥
६२ ॥ वहेत्तावद्घटीमध्ये पंचतत्त्वं विनिर्दिशेत् ॥ प्रतिपत्तो दिनान्याहुर्विपरीते विपर्ययः ॥
३ ॥ ६३ ॥ शुक्लपक्षे भवेद्वामा कृष्णपक्षे च दक्षिणा ॥ जानीयात्प्रतिपत्पूर्वं योगी तद्गतमान

६ सः॥६७॥उदयं चंद्रमार्गेण सूर्येणास्तमनं यदि॥ ददाति गुणसंघातं विपरीते विपर्ययः॥६
८॥ शशांकं चारयेत् रात्रौ दिवा वा यो दिवाकरं॥ इत्याभ्यासरतो नित्यं स योगी नात्र संशयः॥
चं॰ हं ६९॥ बध्यते सूर्य सूर्येण चंद्रेण बध्यते॥ यो जानाति क्रियामेतां त्रैलोक्यं वशवर्तिनः॥७
०॥ गुरुशुक्रबुधेंदूनां वासरे वामनाडिका॥ सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः॥७१॥अ
र्कांगारकसौरीणां वासरे दक्षनाडिका॥ स्मर्तव्या चरकार्येषु कृष्णपक्षे विशेषतः॥७२॥प्र
कैकस्य घटिपंचकं क्रमेणैवोदयंति च॥ क्रमादेकैकनाड्यां तु तत्वानां पृथगुद्भवः॥७३॥अ
होरात्रस्य मध्ये तु ज्ञेया द्वादशसंक्रमाः॥ वृषकर्कटकन्यालिमृगमीनं निशाकरे॥
७४॥ मेषे सिंहे धनुषि तुलायां मिथुने घटे॥ उदये दक्षिणे ज्ञेयो शुभाशुभविनिर्णयः॥७५॥तिष्ठ
न्पूर्वोत्तरे चंद्रो भानुपश्चिमदक्षिणे॥ दक्षनाड्याः प्रवाहे तु न गच्छेद्याम्यपश्चिमे॥७६॥वामाचा
रप्रवाहे तु न गच्छेत्पूर्वमुत्तरे॥ परिपंथिभयं तस्य गतोसौ न निवर्तते॥७७॥तस्मात्तत्र न गंतव्यं ६
बुधैः सर्वहितप्सुभिः॥ तदा तत्र तु संघातं मृत्युरेव न संशयः॥७८॥ शुक्लपक्षे द्वितीयायां

अर्के वहति चंद्रमा॥ दृश्यते लाभदः पुंसां सौम्ये सौख्यं प्रजायते॥७९॥ सूर्योदये यदा सूर्यश्चंद्रश्चं १
द्रोदये भवेत्॥ सिध्यंति सर्वकार्याणि दिवारात्रिगतान्यपि॥८०॥ चंद्रकाले यदा सूर्यः सूर्ये चं
द्रोदये भवेत्॥ उद्वेगकलहो हानिः शुभं सर्वं निवारयेत्॥८१॥ प्रथमे मरणं द्वेगं धनहानिर्द्वितीय
के॥ तृतीये गमने पीडां क्लेशनाशं चतुर्थके॥८२॥ पंचमे राजविध्वंसं षष्ठे सर्वार्थनाशनं॥ सप्तमे
व्याधिदुःखानि अष्टमे मृत्युमेव च॥८३॥ कालत्रयदिनान्यष्टौ विपरीतं यदा वहेत्॥ तदा दुष्टफ
लं प्रोक्तं किंचिन्न्यूने तु शोभनं॥८४॥ प्रातर्मध्याह्नयोश्चंद्रः सायंकाले दिवाकरः॥ तदा नित्यं जयो
लाभो विपरीते तु दुःखदः॥८५॥ वामे वा दक्षिणे वापि यत्र संक्रमते शिवः॥ कृत्वा तत्पादमादौ च
यात्रा भवति सिद्धिदा॥८६॥ चंद्रः समपदः कार्यो रविस्तु विषमः सदा॥ पूर्णपादं पुरस्कृत्य यात्रा
भवति सिद्धिदा॥८७॥ चंद्रचारे चतुष्पादं पंचपादं च भास्करे॥ एवं चामनं प्रेष्य साधयेद्भुवन
त्रयं॥८८॥ यत्रांगे चरते वायुस्तत्रांगस्य करं ततः॥ सुप्तोत्थितो मुखं स्पृष्ट्वा लभते वांछितं फलं॥
८९॥ परदत्ते तथा ग्राह्ये गृहान्निर्गमनेपि च॥ यदंगे वहते नाडी ग्राह्यं गतिकरांघ्रिणा॥९०॥आन

५ हानिः कालहो नैव कंटकैर्न पिपिड्यते ॥ निवर्त्तते सुखेनैव सर्वोपद्रववर्जितः ॥ ८६ ॥ गुरु बंधु-
नृपामात्या अन्येपि शुभदायिनः ॥ पूर्णांगे खलु कर्त्तव्या कार्यसिद्धिं शुभं तथा ॥ ८७ ॥ अरि चौ-
राधमर्णाद्या अन्येषां वादिनिग्रहाः ॥ कर्त्तव्याः खलु रिक्तायां जयलाभसुखार्थिभिः ॥ ८८ ॥ दूर-
देशे विधातव्यं गमनं तु हिमद्युतौ ॥ अभ्युर्ण्णदेशदेशे तु तरणाविति केचन ॥ ८९ ॥ यत्किंचित्पू-
र्वमुद्दिष्टं लाभादि समरागमं ॥ तत्सर्वं पूर्णनाडीषु जायते निर्विकल्पकं ॥ ९० ॥ शून्यनाडी विपर्य-
स्तं यत्पूर्वं प्रतिपादितं ॥ जायते नान्यथा चैव यथा सर्वज्ञभाषितं ॥ ९१ ॥ व्यवहारे खलोच्चाटे द्वे-
षि विद्यादि वंचके ॥ कुपितस्वामि चौराद्ये पूर्णस्थाः स्युर्भयंकराः ॥ ९२ ॥ दूराध्वानि शुभश्चंद्रो नि-
र्विघ्नोष्टसिद्धिदा ॥ प्रवेशकार्यहेतौ च सूर्यनाडी प्रशस्यते ॥ ९३ ॥ चंद्रचारे विषं हंति सूर्यो बं-
लवतो नयेत् ॥ सुषुम्णायां भवेन्मोक्ष एको देवस्त्रिधा स्थितः ॥ ९४ ॥ अयोग्ये योग्यता नाड्या
योग्यस्थानेप्ययोग्यता ॥ कार्यानुबंधनो जीवः कथं रुद्र समाचरेत् ॥ ९५ ॥ शुभान्यशुभकार्याणि
क्रियंते हर्निशं यदा ॥ तदा कार्यानुरोधेन कार्यं नाडी प्रचालनं ॥ ९६ ॥ अथ इडा ॥ स्थिर- ५

कर्माराय लंकारे दूराध्वगमने तथा ॥ आश्रमे धर्म्यप्रासादे वस्तूनां संग्रहेपि च ॥ ९९ ॥ वापी कूपत-
डागादि प्रतिष्ठा स्तंभदेवयोः ॥ यात्रादाने विवाहे च वस्त्रालंकारभूषणे ॥ १०० ॥ शांतिके पुष्टिके चै-
व दिव्यौषधि रसायने ॥ स्वः स्वामीदर्शने मैत्रे वाणिज्ये सर्वसंग्रहे ॥ १०१ ॥ गृहप्रवेशे सेवायां
कृष्यां च बीजवापने ॥ शुभकर्माणि संधौ च निर्गमे च शुभः शशी ॥ २ ॥ विद्यारंभादि कार्येषु बां-
धवानां च दर्शने ॥ जन्ममोक्षादि धर्मे च दीक्षायां मंत्रसाधने ॥ ३ ॥ कालविज्ञानसूत्रे च चतुष्प-
दगृहागमे ॥ कालव्याधिचिकित्सायां स्वामिसंबोधने तथा ॥ ४ ॥ गजाश्वारोहणे धन्वी गजा-
श्वानां च बंधने परोपकरणे चैव निधीनां स्थापने तथा ॥ ५ ॥ गीतवाद्यादि नृत्यादौ गीतशास्त्र-
विचारणे ॥ पुरग्रामनिवेशे च तिलकक्षेत्रधारणे ॥ ६ ॥ आर्तिशोकविषादेषु ज्वरिते मूर्छि-
तेपि च ॥ स्वजनस्वामिसंबंधे धान्यादिदारसंग्रहे ॥ ७ ॥ स्त्रीणां दंतादि भूषायां वृष्टेरागमने
तथा गुरुपूजाविषादीनां चालने वरानने ॥ ८ ॥ इडायां सिद्धिदं प्रोक्तं योगाभ्यासादि कर्म
च ॥ तथापि वर्जयेद्वायुं तेजस्वाकाशमेव च ॥ ९ ॥ सर्वकार्याणि सिद्ध्यंति दिनरात्रिगतान्य-

६ पि॥ सर्वेषु शुभकार्येषु चंद्रचारः प्रशस्यते॥१०॥ अथ पिंगलासाधनानि क्रुरकठिनविद्या
यां पठने पाठने तथा॥ स्त्रीसंगवेश्यागमने महानौकाधिरोहने॥११॥ भ्रष्टकार्ये सुरापाने
वीरमंत्राद्युपासने॥ विह्वलो ध्वंसदेशादि विषदाने च वैरिणां॥१२॥ शास्त्राभ्यासे च गमने
मृगयापशुसंक्षये॥ इष्टिकाकाष्ठपाषाणरत्नाघर्षणदारणे॥१३॥ गत्याभ्यासे यंत्रतंत्रे
दुर्गपर्वतरोहणे॥ द्यूते चौर्ये गजाश्वादिरथसाधनवाहने॥१४॥ व्यायामे मारणे वापि उच्चाटक
र्मसाधने॥ यक्षिणीयक्षवेतालविषभूतादिनिग्रहे॥१५॥ खरोष्ट्रमहिषादीनां गजाश्वारोहणे
तथा॥ नदीजलौघतरणे भेषजे लिपिलेखने॥१६॥ मारणे मोहने स्तंभे विद्वेषोच्चाटने तथा॥ प्रेर
णाकर्षणे क्षोभे दाने च क्रयविक्रये॥१७॥ खड्गहस्ते वैरियुद्धे भोगे वा राजदर्शने॥ भोज्ये स्नाने
व्यवहारे क्रूरे दीप्ते रविः शुभः॥१८॥ भुक्तमात्रे मंदाग्नौ स्त्रीणां वश्यादिकर्मणि॥ शयनं
सूर्यवाहेन कर्तव्यं सर्वदा बुधैः॥१९॥ क्रूराणि सर्वकार्याणि चराणि विविधानि च॥ तानि सि ६
ध्यंति सूर्येण नात्र कार्या विचारणा॥२०॥ अथ सुषुम्णा॥ क्षणं वामे क्षणं दक्षे यदा वहति

मारुतः॥ सुषुम्णा सा च विज्ञेया सर्वकार्यहरा स्मृता॥२१॥ तस्यां नाड्यां स्थितो वन्हिः कालरूपे स
दा ज्वलन्॥ विषवत्तं विजानीयात्सर्वकार्यविनाशिनं॥२२॥ क्षणं वामे क्षणं दक्षे विषमं भावमा
श्रितः॥ विपरीतं फलं ज्ञेयं सर्वं चैव वरानने॥२३॥ उभयोरेव संचारे विषवत्तं विदुर्बुधाः॥ न कुर्यात् व
क्रूरसौम्यानि सर्वं तन्निष्फलं भवेत्॥२४॥ जीविते मरणे प्रश्ने लाभालाभे जयाजये॥ विषमे वैपरी
त्ये संस्मरेज्जगदीश्वरं॥२५॥ विचिंतयेदीश्वरं कार्यं योगाभ्यासादिकर्मसु अन्यत्तत्र न कर्तव्यं ज
६ यलाभसुखैषिभिः॥२६॥ सूर्येण वहमानायां सुषुम्णायां मुहुर्मुहुः॥ सुखं दद्याद्वरं दद्यात्सर्वथा त
दन्यथा॥२७॥ नाडीसंक्रमणे काले तत्त्वसंक्रमणे तथा॥ शुभं किंचिन्न कर्तव्यं पुण्यं चापि च
सर्वथा॥२८॥ विषमस्योदये प्राज्ञो मनसापि न चिंतयेत्॥ यात्रा हानिकरी तस्य मृत्युः क्लेशो न
संशयः॥२९॥ पुरो वामोर्ध्वतश्चंद्रो दक्षाधः पृष्ठतो रविः॥ पूर्णरिक्तविवेकोयं ज्ञातव्यो देशिकैः
सदा॥३०॥ ऊर्ध्वं वामाग्रतो दूतो ज्ञेयो वामपथि स्थितः॥ पृष्ठे दक्षे तथाधस्तात्सूर्यवाहगतः
शुभः॥३१॥ अनादिर्विषमः संधिर्निराहारो निराकुलः॥ परे सूक्ष्मे विलीयेत सा संध्या संधि

१ रुच्यते ॥ २२ ॥ न संध्या संधिरित्याहुः संध्या संधिर्निगद्यते ॥ विषुवत्संधिगः प्राणः स संध्या संधि
रुच्यते ॥ २३ ॥ न वेदं वेद इत्याहुः वेदो वेदो न विद्यते ॥ परमात्मा विद्यते येन स वेदो वेद उच्यते ॥ २४ ॥ न
इति नादभेदः ॥ अथ तत्वनिर्णयः ॥ श्रीदेव्युवाच ॥ देवदेव महादेव सर्वसंसारतारक ॥ स्थितं त्व
दीये हृदये रहस्यं वद मे प्रभो ॥ २५ ॥ ईश्वर उवाच ॥ स्वरज्ञानरहस्यात्तु न किंचिदिष्टदेवता ॥ स्व
रज्ञानरतो योगी स योगी परमो मतः ॥ २६ ॥ पंचतत्वाद्भवेत्सृष्टिस्तत्वं तत्वे विलीयते ॥ पंचतत्वं पर
तत्वं तत्वातीतं निरंजनं ॥ २७ ॥ तत्वानां नाम विज्ञेयं सिद्धियोगेन योगिनां ॥ भूतानां दुष्टचिह्नानि
जानंति हि स्वरोत्तमः ॥ २८ ॥ पुरे वा मूर्द्धे तत्स्थं ज्ञोदर्शितः प्रत्ययो रविः ॥ सर्वशिक्त विवेको यं ज्ञात
व्यो देशिके सदा ॥ २९ ॥ पृथिव्यापस्तथा तेजो वायुराकाश एव च ॥ पंचभूतात्मकं सर्वं यो जा
त नाति स पूजितः ॥ ३० ॥ सर्वलोकस्थजीवानां न देहे भिन्नतत्वकं ॥ भूर्लोकात्सत्यपर्यंतं नाडीभेदः
पृथक्पृथक् ॥ ३१ ॥ वामे वा दक्षिणे वापि उदयाः पंच कीर्तिताः ॥ अष्टधा तत्वविज्ञानं शृणु वक्ष्या ९
मि सुंदरि ॥ ३२ ॥ प्रथमे तत्वसंख्यायां द्वितीये श्वाससंधिषु ॥ तृतीये स्वरचिह्नानि चतुर्थे स्थानमे

व च ॥ ३३ ॥ पंचमे तत्ववर्णश्च षष्ठे तु प्राण मेव च ॥ सप्तमे स्वादसंयुक्तमष्टमे गतिलक्षणं ॥ ३४ ॥ एवमष्टविधं प्राणं वि
षुवंते चराचरं ॥ स्वरात्परतरं देवि नान्यथा त्वंबुजानने ॥ ३५ ॥ ईक्षितव्यं प्रयत्नेन यदा प्रत्यूषकालतः ॥ काल
स्य वंचनार्थाय कर्म कुर्वंति योगिनः ॥ ३६ ॥ श्रुत्योरंगुष्ठौ मध्यांगुल्यौ नासापुटद्वये ॥ वदने प्रांतदेशे च गु
ल्यौ शेषे दृगंतयोः ॥ ३७ ॥ अस्यांतः पृथिव्यादितत्वज्ञानं भवेत्क्रमात् ॥ पीतः श्वेतारुणः श्याम बिंदुभिश्च नि
रूप्यते ॥ ३८ ॥ दर्पणेन समालोक्य तत्र श्वासं निक्षिपेत् ॥ आकारैस्तु विजानीयात्तत्वभेदं विचक्षणः ॥ ३९ ॥ चतु
रस्रमर्द्धचंद्रं त्रिकोणं वर्तुलं स्मृतं ॥ बिंदुभिस्तु नभो ज्ञेयं साकारैस्तत्वलक्षणं ॥ ४० ॥ मध्ये पृथ्वी ह्यधश्चाप
श्चोर्ध्वं वहति चानलः ॥ तिर्यग्वायुप्रवाहश्च नभो वहति संक्रमे ॥ ४१ ॥ आपः श्वेताः क्षितिः पीता रक्तवर्णो हुताश
नः ॥ मारुतो नीलजीमूत आकाशः सर्ववर्णकः ॥ ४२ ॥ प्रथमे वहते वायुर्द्वितीये च तथानलः ॥ तृतीये वहते भूमिश्च
तुर्थे वारुणो वहेत् ॥ स्कंधद्वये स्थितो वह्निर्नाभिमूले प्रभंजनः ॥ जानुदेशे क्षितिस्तोयं पादांते मस्तके नभः ॥ ४४ ॥
माहेयं मधुरं स्वादं कषायं जलमेव च ॥ तिक्तं तेजश्च वातोम्लमाकाशं कटुकं तथा ॥ ४५ ॥ अष्टांगुलं वहेद्वायु
रनलश्चतुरंगुलं ॥ द्वादशांगुल माहेयं षोडशांगुल वारुणं ॥ ४६ ॥ ऊर्ध्वं मृत्युरधः शांतिस्तिर्यगुच्चाटनं तथा ॥

८ मध्ये स्तंभं विजानीयात् नभो भवति मध्यमः॥५७॥ पृथिव्यां स्थिरकर्माणि चरकर्माणि वारुणे॥ तेजसि सम
कर्माणि मारणोच्चाटनेऽनले॥५८॥ व्योम्नि किंचिन्न कर्तव्यमभ्यसेद्योगसेवया॥ शून्यता सर्वकार्येषु
नात्र कार्या विचारणा॥५९॥ पृथ्वीजलाभ्यां सिद्धिः स्यान्मृत्युर्वह्नौ क्षयोऽनिले॥ नभसो निष्फलं सर्वं ज्ञा
तव्यं तत्त्ववेदिभिः॥६०॥ चिरलाभः क्षितिर्ज्ञेयस्तत्क्षणात्तोयतत्त्वतः॥ हानिः स्याद्वह्निवाताभ्यां नभसो नि
ष्फलं भवेत्॥६१॥ पीतः शनैर्मध्यवाही हनुं यावद्गुरुध्वनः॥ कोष्णो दमः पार्थिवो वायुः स्थिरकार्यप्रसाध
अ कः॥६२॥ अधोवाही गुरुध्वानः शीघ्रगः शीतलः स्थितः॥ यः षोडशांगुली वायुः स आपः शुभकर्मकृत्॥६३॥ आ
वर्तगश्चात्युष्णो हि शोणाभश्चतुरंगुलः॥ ऊर्ध्ववाही च यः क्रूरः कर्मकारी स तैजसः॥६४॥ उष्णशीतकृष्ण
स्तिर्यग्गामी चाष्टांगुलः॥ वायुः पवनसंज्ञेयं चरकर्मसु सिद्धिदः॥६५॥ यः समीरः समरसः सर्वतत्त्वगुणावह
:॥ अंबरं तं विजानीयाद्योगिनां योगदायकं॥६६॥ पीतं श्वेवच्च लस्कोरागं मधुरे मध्यमाश्रितं॥ मोदं पार्थिवं
तत्त्वं प्रवाहे द्वादशांगुले॥६७॥ श्वेतमर्द्धेंदुसंकाशं स्वादुकाषायमोदकं॥ लाभकृद्वारुणं तत्त्वं प्रवाहे षोड
शांगुलं॥६८॥ रक्तं त्रिकोणं तिक्ष्णं स्यादूर्ध्वमार्गप्रवाहकं॥ दीप्तं च तैजसं तत्त्वं प्रवाहे चतुरंगुलं॥६९॥ नी ८

लं च वर्तुलाकारं स्वादाम्लं तिर्यगाश्रितं॥ चपलं मारुतं तत्त्वं प्रवाहेऽष्टांगुलं स्मृतं॥७०॥ वर्णाकारं स्वादुवहं व्याप
कं सर्वगामिनं॥ मोक्षदं नभसं तत्त्वं सर्वकार्येषु निष्फलं॥७१॥ पृथ्वीजले शुभे तत्त्वे तेजो मिश्रफलोदयं॥ हा
निमृत्युकरौ पुंसामशुभौ व्योममारुतौ॥७२॥ आपः पूर्वे पश्चिमे पृथ्वी तेजश्च दक्षिणे तथा॥ वायुश्चोत्तरदिग्भागे
मध्यकोणगतं नभः॥७३॥ चंद्रे पृथ्वीजले स्यातां सूर्ये चाग्निर्यदा भवेत्॥ तदा सिद्धिर्न संदेहः सौम्यासौम्येषु
कर्मसु॥७४॥ लाभः पृथ्वीकृतोऽह्नि स्यान्निशायां लाभकृज्जलं॥ वह्नौ मृत्युः क्षितिर्वायो नभस्यानं दहेत्क्वचि
त्॥७५॥ जीवितव्ये जये लाभे कृष्यां च धनकर्मणि॥ मंत्रार्थे युद्धप्रश्ने च गमनागमने तथा॥७६॥ आयाति वा
रुणे तत्त्वे तत्रस्थोपि शुभं क्षितौ॥ प्रयाति वायुतोऽन्यत्र हानिमृत्युर्नभेऽनले॥७७॥ पृथिव्यां मूलचिंता स्याज्जीवस्य
जलवातयोः॥ तेजसि धातुचिंता स्यात् शून्यमाकाशतो वदेत्॥७८॥ पृथिव्यां बहुपादाः स्युर्द्विपदस्तोयवा
युतः॥ तेजसि च चतुष्पादा नभसि पादवर्जितं॥७९॥ कुजो वह्निरविः पृथिवी सौरिरापः प्रकीर्तितः॥ वायुस्थाने स्
स्थितो राहुर्दक्षरंध्रप्रवाहकः॥८०॥ जलं चंद्रो बुधः पृथ्वी गुरुर्वातः सितोऽनलः॥ वामनाड्यां स्थिताः सर्वे स
र्वकार्येषु निश्चिता॥ बुधोऽनलो दिशो शुक्रो वह्नि रविः कुजस्तथा॥ वायु राहुः शनिर्व्योम्नि गुरुरेव प्रकीर्तितः॥

६ ॥८२॥ पार्थिवीमलविज्ञानं तेजो वेज्ञानं नलं तथा॥ आग्नेयं धातु विज्ञानं व्योम्नि शून्यं विनिर्दिशेत्॥८३॥ तु
ष्टिः पुष्टिः रतिः क्रीडा जयदा स्यात् धरातले॥ तेजो वायौ च वसुधा जन्वरः॥ कंपश्च वारिणि॥८४॥ गतायुर्मृत्युरा
काशे च तावत् स्यात् पूर्वोक्तैकी त्रिता॥ घाद्दशैला प्रयत्नेन ज्ञातव्या दैशिके सदा॥८५॥ पृथ्वीयां पश्चिमे याम्ये उत्त
रस्यां च यथाक्रमं॥ पृथिव्यादिनि भूतानि बलिष्ठानि विनिर्दिशेत्॥८६॥ पृथिव्यापस्तथा तेजो वायुराका
शमेव च॥ पंचभूतात्मकं देहं ज्ञातव्यं च वरानने॥८७॥ अस्थिमांसं त्वचा रोम नाडी चैव तु पंचमं॥ पृथि-
वी पंचगुणा प्रोक्ता ब्रह्मज्ञानेन भाषितं॥८८॥ शुक्रशोणितमज्जा च मलं मूत्रं च पंचमं॥ आपः पंचगुणाः प्रो
क्ता ब्रह्मज्ञानेन॥८९॥ क्षुधा तृषा तथा निद्रा कांतिरालस्यमेव च॥ तेजः पंचगुणं प्रोक्तं ब्रह्मज्ञानेन॥९०॥ धावनं
वल्गनं गंधं संकोचं च प्रसारणं वायोः पंचगुणाः प्रोक्ताः ब्रह्मज्ञानेन॥९१॥ रागद्वेषस्तथा लज्जा भयं मोह एव पंच
माकाशः पंचगुणं प्रोक्तं ब्रह्मज्ञा॥९२॥ पृथिवी पलपंचाशत् चत्वारिंशत् दापस्तथा॥ तेजस्त्रिंशत् द्विजानीया द्वा
युर्विंशतिर्दिग्व्योमनः॥९३॥ पार्थिवे चिरकालेन च लाभः स्यात् प्रहरार्द्धं वे तत्॥ जायते पवनाख्ये स्वल्पः सिद्धोऽप्यग्नौ
विनश्यति॥९४॥ पृथिवी पंच आपो वेदा गुणास्तेजो द्विवायुतः॥ नभस्येकगुणं चैव तत्वज्ञानमिदं भवेत् ६

९५॥ फूत्कारकृत्प्रस्फुटिता विदीर्णा पतिताधरा॥ ददाति सर्वकार्येषु अवस्थासदृशं फलं॥९६॥ धनिष्ठा रोहि
णी ज्येष्ठानुराधा श्रवणास्तथा॥ अभिजिच्चोत्तराषाढा पार्थिवं तत्वमुदाहृतं॥९७॥ पूर्वाषाढा तथाश्लेषा मूल
च मार्द्रा रोहिणी॥ उत्तराभाद्रपदा ... तत्वं वरानने प्रिये॥९८॥ भरणी कृत्तिका पुष्यं मघा पूर्वा च फल्गुणी
पूर्वभाद्रपदा स्वाति तेजस्तत्वमिति प्रिये॥९९॥ विशाखोत्तरफाल्गुन्यो हस्तचित्रा पुनर्वसु॥ अश्विनी मृग
शीर्षं च वायुतत्वमुदाहृतं॥१००॥ दृष्टान्तादौ स्थितो हि तो यस्य ... तिष्ठं तथा॥ तत्सर्वं सिद्धिमायाति शून्ये
शून्ये न संशयः॥१॥ तत्वे वा नीजये प्राप्तस्तत्वे च धनंजयः॥ कौरवा निहताः सर्वे युद्धे तत्वविपर्यये॥२॥ जन्मांतरी
यसंस्कारात् प्रसादादथवा गुरोः॥ केषांचिज्जायते तत्वे मनो विमलात्मनां॥३॥ अथ पंचतत्वध्यानं॥ लं बीजं
धरणीं ध्यायेच्चतुरस्रं सुपीतभां॥ सुगंधं स्वर्णवर्णमारोग्यं देहलाघवं॥४॥ वं बीजं वारुणीं ध्यायेदर्धचंद्रं
शिप्रभं॥ क्षुत्तृष्णादिसहिष्णुत्वं जलमध्ये च मज्जनं॥५॥ रं बीजं शिखिनं ध्यायेत्त्रिकोणमरुणप्रभं॥ बह्वन्न
पानभोक्तृत्वमातपाग्निसहिष्णुता॥६॥ यं बीजं पवनं ध्यायेद्वर्तुलं श्यामलप्रभं॥ आकाशगमनाद्यं च
पक्षिवद्गमनं तथा॥७॥ हं बीजं गगनं ध्यायेन्निराकारं बहुप्रभं॥ ज्ञानं त्रिकालविषयमैश्वर्यमणिमादिकं॥८॥
व

१० स्वरज्ञानीनरोयत्रधनंनास्तिततःपरं॥गम्यतेस्वरज्ञानेनअनायासंफलंलभेत्॥८॥इतितत्वध्यानं॥अथ
युद्धविजयः॥श्रीदेव्युवाच॥देवदेवमहादेवमहाज्ञानंस्वरोदयं॥त्रिकालविषयंचैवकथंभवतिशंक
र॥१॥ईश्वरोवाच॥अर्थकालजयप्रश्नशुभाशुभमितित्रिधा॥एतत्त्रिकालविज्ञानंनान्यद्भवतिसुंदरि॥२॥
तत्वेशुभाशुभंकार्यंतत्वेजयपराजयौ॥तत्वेसमर्घमहर्घंचतत्वंत्रिपदमुच्यते॥३॥देव्युवाच॥देवदेवम
हादेवसर्वसंसारसागरे॥किंनराणांपरंमित्रंसर्वकार्यार्थसाधनं॥४॥शिवउवाच॥प्राणएवपरंमित्रंप्रा
णएवपरःसखा॥प्राणतुल्यपरोबंधुर्नास्तिनास्तिवरानने॥५॥श्रीदेव्युवाच॥कथंप्राणस्थितोवायुर्देहःकिंप्रा
णरूपकः॥तत्वेषुसंचरन्प्राणोज्ञायतेयोगिभिःकथं॥श्रीशिवउवाच॥कायानगरमध्येतुमारुतोरक्षपाल
कः॥प्रवेशेदशभिःप्रोक्तोनिर्गमेद्वादशांगुलः॥७॥गमनेतुचतुर्विंशानेत्रवेदास्तुधावने॥मैथुनेपंचष
ष्टिश्चशयनेचशतांगुलः॥८॥प्राणस्यतुगतिर्देविस्वभावाद्द्वादशांगुला॥भोजनेवमनेचैवगतिरष्टाद
शांगुलः॥९॥एकांगुलेकृतेन्यूनेप्राणेनिष्कामतामता॥आनंदस्तुद्वितीयेस्यात्कविशक्तिस्तृतीयके
॥१०॥वाचासिद्धिश्चतुर्थेतुदूरदृष्टिस्तुपंचमे॥षष्ठेत्वाकाशगमनंचंडवेगश्चसप्तमे॥११॥अष्टमेसिद्ध १०

यश्चाष्टौनवमेनिधयोनव॥दशमेदशमूर्तिश्चछायानाशोदशैकके॥१२॥द्वादशेहंसचारश्चगंगामृ
तरसंपिबेत्॥आनखाग्रेप्राणपूर्णेकस्यभक्ष्यंचभोजनं॥१३॥एवंप्राणविधिःप्रोक्तःसर्वकार्यफलप्रदः॥
ज्ञायतेगुरुवाक्येननविद्याशास्त्रकोटिभिः॥१४॥प्रातश्चंद्रोरविःसायंयदिदैवान्नलभ्यते॥मध्याह्नम
ध्यरात्रिश्चापरतस्तौप्रवर्त्तते॥१५॥दूरयुद्धेजयंचंद्रःसमासन्नेदिवाकरः॥वहन्नाड्यागतःपादःसर्वसिद्धिः
प्रजायते॥१६॥यात्रारंभेविवाहेचप्रवेशेनगरादिके॥शुभकार्येषुसर्वेषुचंद्रचारःप्रशस्यते॥१७॥
अयनतिथिदिननाःस्त्रीयतलेनसुक्रेयदिवहतिकदाचिद्दैवयोगेनपुंसां॥सजयतिरिपुसैन्यंस्तंभ
मात्रस्वरेणप्रभवतिनचविघ्नंकेशवस्यापिलोके॥१८॥जीवंरक्षेज्जीवंरक्षांजीवांगेपरिधायच॥जीवोजा
यतियोयुद्धेजीवन्जयतिमेदिनीं॥१९॥भूमौजलेचकर्तव्यंगमनंशांतिकर्मसु॥वन्हौवायौप्रदीप्ते
षुवैषुनेनीलयेष्वपि॥२०॥जीवेनशस्त्रंबध्नीयाज्जीवेनैवविकासयेत्॥जीवेनप्रक्षिपेच्छस्त्रंयुद्धेजयति
सर्वदा॥२१॥आकृष्यप्राणपवनंसमारोहेतवाहनं॥समुत्तरेपदंदद्यात्सर्वकार्याणिसाधयेत्॥२२॥अपू
र्णेशत्रुसामग्रीपूर्णेचस्वबलंतथा॥कुरुतेपूरितंतत्वंयोजयेदेकोवसुंधरां॥२३॥यान्नाडीवहतेचांगंतस्या

नैवाधिदैवता॥सन्तुष्टापि द्विजातेषां सर्वकार्यफलप्रदा॥३३॥ आदौ तु क्रियते मुद्रा पश्चाद्युद्धं समाचरेत्
११ ॥सर्पमुद्रा कृता येन तेषां सिद्धिर्न संशयः॥३४॥ चंद्रप्रवाहेप्यथ सूर्यप्रवाहे भटाः समायांति योद्धुकामाः॥
समीरणस्तत्त्वविदां प्रतीता या शून्यता सा प्रतिकार्यनाशे॥३५॥ यां दिशं वहते वायुर्युद्धं तद्दिशि दापयेत्॥ज
यत्येव न संदेहः शक्रोपि यदि चाग्रतः॥३६॥ यत्र नाड्यां वहेद्वायुस्तदंगं प्राणमेव च॥ आकृष्य गच्छेत्कर्ण
निर्जयत्येव पुरंदरं॥३७॥ प्रतिपक्षप्रहारेभ्यो पूर्णांगं यो भिरक्षयेत्॥ न तस्य रिपुभिः शक्तिर्बलिष्ठैरपि हन्य
ते॥३८॥ अंगुष्ठतर्जनीवंशे पादांगुष्ठे तथा ध्वनि॥ युद्धकाले च कर्तव्यं लक्षयोधाज्जयो भवेत्॥३९॥ नि
शाकरे रवौ चारे मध्ये यस्य समीरणः॥ स्थितो रक्षेद्दिगंतानि जयकांक्षी नरः सदा॥४०॥ श्वासप्रवेशकाले
तु दूतो जल्पति वांछितं॥ तस्य कार्यस्य सिद्धिः स्यान्निर्गमे नैव सुंदरि॥४१॥ लाभादीन्यपि कार्याणि पृष्टानि कीर्तिता
नि च॥ जीवं विशति सिद्धिः स्याद्धानिर्निःसरणे भवेत्॥४२॥ नरे दक्षा स्वकीया च स्त्रियां वामा प्रशस्यते॥ कुंभकं
युद्धकाले पु तिस्रो नाडी त्रयो गतिः॥४३॥ हकारस्य सकारस्य विना भेदः स्वरः कथं॥ सोहं हंस पदेनैव जीवो ज
यति सर्वदा॥४४॥ शून्यांगं पूरितं कृत्वा जीवांगे गोपयेज्जयं॥ जीवांगे घातमाप्नोति शून्यांगं रक्षयेत्सदा॥४५॥ वामे ११

वा दक्षिणे वापि यदि पृच्छति पृच्छकः॥ पूर्णे घातो न जायेत शून्ये घातं विनिर्दिशेत्॥४६॥ भूतत्त्वेनोदरे घातः प
दस्थाने ऽबुना भवेत्॥ ऊरुस्थाने ग्नितत्त्वेन करस्थाने च वायुना॥४७॥ शिरसि व्योमतत्त्वेन ज्ञातव्यो घातनिर्णयः॥ म
एवं पंचविधो घातः स्वरशास्त्रे प्रकाशितः॥४८॥ युद्धकाले कृते चंद्रे पूर्णे यत्प्रयत्नो जयः॥ शिक्षके चैव यदि ती यस्य ॥३
जयी भवति नान्यथा॥४९॥ पूर्णनाडीगतः पृष्ठे शून्यं संदांतदग्रतः॥ शून्यस्थाने हतो शत्रुर्म्रियते च न संशयः
॥५०॥ वामचारे समं नाम यस्य तस्य जयो भवेत्॥ पृच्छको दक्षिणे भागे विजयी विषमाक्षरः॥५१॥ यदा पृच्छति
५ स्व चंद्रस्यस्तदा संधानमादिशेत्॥ पृच्छेद्यदा तु सूर्यस्तदा जानीहि विग्रहं॥५२॥ पार्थिवे च समं युद्धं सिद्धिर्भव
ति वारुणे॥ युद्धे हि तेजसि भंगो मृत्युर्वायुनभस्यपि॥५३॥ निमित्तात्कप्रमादाद्वा यदा न ज्ञायते निलः॥ प्र
ष्टकाले तदा कुर्यादिदं यत्नेन बुद्धिमान्॥५४॥ निश्चलां धारणां कृत्वा पुष्पहस्तान्निपातयेत्॥ पूर्णांगे पु
ष्पपतनं शून्यं वा तत्फलं भवेत्॥५५॥ तिष्ठन्नुपविशन्वापि प्राणमायेति निर्गमन्॥ मनो भंगमकुर्वी
रनः सर्वकार्येषु जीवति॥५६॥ जीवेन स्थापयेद्वायुं जीवेनारंभयेत्पुनः॥ जीवेन क्रीडते नित्यं द्यूत
जयति सर्वदा॥५७॥ स्वरज्ञाने बलादग्रे निःफलं कोटिधा भवेत्॥ इहलोके परत्रे च स्वरज्ञानी बली

१२ सत्ता॥ ७९॥ दशवारासुतलक्ष्म देवाधिपं वनेकचित्॥ रात्रौ ऋतुसुरेंद्राणां वत्सकोटिगुणं भवेत्॥ ८
०॥ देव्युवाच॥ परस्परं मनुष्याणां युद्धे रक्तो जयस्तथा॥ परस्त्री तु समुत्पन्ने मनुष्याणां कथं जय॥ ईश्व
रोवाच॥ ध्यायेद्देवं स्थिरे जीवे जुहुयाज्जीवसंगमे॥ इष्टसिद्धिर्भवति रूपमहालाभो जयस्तथा॥ ८१॥
निराकारात्समुत्पन्नं साकारं सकलं जगत्॥ तत्साकारं निराकारं ज्ञाने भवति तन्मयं॥ ८२॥ इति युद्धप्रक
रणं॥ देव्युवाच॥ नरयुद्धं यमयुद्धं त्वया प्रोक्तं महेश्वर॥ अस्मिन्निस्यात्तापरमेश्वरि॥ ८३॥ इति स्त्रीकरणं व
ल अथ गर्भप्रकरणं॥ ऋतुकाले तु या नारी पंचमे ... मदा नवेत्सूर्ये चंद्रमसो पीगसेवनात्तु त्रसंनव॥ ८४॥
ज्ञात्वा वज्ञोग वीडुगर्भं द्रव्यार्थी वहते यदा नतु रंगे वदे वाकं दर्पे देहि त्रिनिर्वच॥ ८५॥ ऋतुस्नाता पिबेन्नारी
ऋतुदाने तु योजयेत्॥ रूपलावण्यसंपन्नो नरः सिंहः प्रसूयते॥ ८६॥ सुषुम्ना सूर्यगा येन ऋतुदाने तु
योजयेत्॥ अंगहीनः पुमान्यस्तु जायते ह्यस्य विस्तरा॥ ८७॥ विषमांके दिवारात्रौ विषमांके दिनाधिपः
॥ चंद्रनेत्राग्नितत्वेषु वंध्यापुत्रमवाप्नुयात्॥ ८८॥ कृत्वा रेवेरविपुंसो सुत्रदत्वांते सुधाकरः॥ अनेन क्रम १२
योगेन नाडस्से देवदंडकः॥ कृत्वा रविरवि पुंसां स्त्रियां चैव सुधाकरः॥ उभयोः संगमे प्राप्ते वंध्यापुत्र

मवाप्नुयात्॥ ९०॥ चंद्रनाडिवहे चंद्रयोगे गर्भे कं स्यात्तदा भवेत्॥ सूर्ये भवेत्तदा पुत्रो द्वययोगे गर्भो विहन्यते॥ ९१॥ चं
द्रे स्त्री पुरुषः सूर्ये मध्यभागे नपुंसकः॥ गर्भप्रश्ने यदा दूते पूर्णे पुत्रः प्रजायते॥ ९२॥ पृथ्व्यां पुत्री जले पुत्रः कन्यका
युत्रनंजने॥ तेजसः गर्भपतनं स्यान्नभसापि नपुंसकः॥ ९३॥ शून्ये स्तंभे युग्मे गर्भपातः सु संक्रमे स्वये नागे
कनेपुत्रश्च द्वन्द्वे चरे तु कन्यका॥ ९४॥ विषुवत्काले पातः स्याद्वा वीचापि नपुंसकः॥ तत्वविस्तविज्ञानी पालको
पिसंतत्र सुंदरि॥ ९५॥ गर्भाधानं मारुतिस्याच्चदुःखी दशारव्यातो वारुणी सौख्यमतसुकं॥ गर्भस्त्रावी स्व
ल्पजीवी च वह्नौ भोगी न व्योपपृथिवेनार्थयुक्तः॥ ९६॥ धनवान्सौख्य युक्तः स्वलानोगवा गर्भसंस्थितः॥ स्या
निसंवारुणीत्वे व्योम्नि गर्भे विनश्यति॥ ९७॥ माहेंद्रे सुसुतोत्पत्ति वारुणी दुहिता भवेत्॥ शेषेषु गर्भ
हानिः स्याज्जायमानस्य चायस्त्रिः॥ ९८॥ रविमध्यगतश्चंद्रश्चंद्रमध्यगतो रविः॥ ज्ञातव्यं गुरुतः शी घ्रंन
वेदशास्त्रकोटिभिः॥ ९९॥ इति गर्भप्रश्नः॥ अथ नववर्षप्रकरणं॥ चैत्रशुक्ले प्रतिपदि प्रतस्तत्व विनिर्दिशेत्॥ १००
॥ पन्नेव दीक्षणे याम्ये दक्षिणे चोत्तरायणे॥ चंद्रोदयस्य वेलायां वर्तमाने यतत्वतः॥ १०१॥ पृथिवी पस्तथा
वायुः सुभिक्षं सर्वसंपन्नं तेजो व्योम्नि भयं घोरं दुर्भिक्षं कालतत्वतः॥ एवं तत्वफलं ज्ञेयं सर्वे मासे दिने तथा।

१३ ॥८२॥ मध्यमा नवतिक्रूरा दुष्टा सर्वचक्र नेसु॥ देशभंगं महारोगं ... केराक स्यादि दुःखदा॥८३॥ मेषसंक्रां
तिवेलायां स्वरभेदं विचारयेत्॥ संवत्सरफलं तस्मात् लोकानां तत्त्वचिंतकः॥८४॥ एवमादिक्रमेणैव
दिनमासादिजं फलं॥ शोभनं च तथा दुष्टं सोममारुतवह्निभिः॥८५॥ सुभिक्षं राष्ट्रवृद्धिः स्याद्बहुशस्या वसु
धरा॥ बहुवृष्टिस्तथा सौख्यं पृथ्वीतत्त्वं वहेद्यदि॥८६॥ अतिवृष्टिसुभिक्षं स्यादारोग्यं सौख्यमेव च॥ बहुश
स्यास्तथा पृथ्वी आपस्तत्त्वं वहेद्यदि॥८७॥ दुर्भिक्षं राष्ट्रभंगं च स्याद्रोगोत्पत्तिः सुदारुणा॥ अल्पादल्पतरा
वृष्टिरग्नितत्त्वं वहेद्यदि॥८८॥ उत्पातोपद्रवा भीतिरल्पा वृष्टिः सुरातपः॥ मेषसंक्रांतिवेलायां वायुत
त्त्वं वहेद्यदि॥८९॥ मेषसंक्रांतिवेलायां व्योमतत्त्वं वहेद्यदि॥ तत्रापि शून्यता ज्ञेया सस्यादीनां सुखस्य च
॥२००॥ पूर्णप्रवेशने श्वासे स्वस्वतत्त्वेन सिद्धिदः॥ सूर्यचंद्रे तथान्यैः संग्रहैः सर्वसिद्धिदः॥१॥ विषमे
मा वक्रिते तत्त्वस्य ज्ञायते केवलेन तु॥ तत्कार्ये हस्तयंत्र्यंते धिसे च मनदर्थता॥२॥ रवौ संक्रमतो नाडिम १३
ध्यांते च प्रसर्पिति॥ रवानिलेन क्रियोगेपि रोगं जगतीतले॥३॥ इति संवत्सरप्रकरणं॥ अथ रोगप्रक
रणं॥ महीतत्त्वे स्वरोगं च जले च जलमातरः॥ तेजसि खेचरी वायौ चत्राकिनी पित्तदोषकैः॥४॥ आदौ शून्यग

ते च ते पश्चात्पूर्णो प्रविशते यदि॥ मूर्छितोपि ध्रुवं जीवेद्यदर्थं परिपृच्छति॥५॥ यस्मिन्नंगे स्थितो जीवस्तत्र
स्थः परिपृच्छति॥ तदा जीवति जीवोसौ यदि रोगैरुपद्रुतः॥२०६॥ दक्षिणेन यदा वायुर्दूतो रौद्राक्षरं वदे
देत्॥ तदा जीवति जीवोसौ चंद्रे समफलं मतं॥७॥ जीवाकारं च वा धृत्वा जीवाकारं विलोक्य च॥
जीवस्थो जीवितं पृच्छेत्तस्य स्याज्जीवितं फलं॥८॥ वामाचारे तथा दक्षः प्रवेशो यत्र वाहने॥ तत्रस्थः पृच्छ
ते तत्तस्य सिद्धिर्न संशयः॥९॥ अग्रे चाधः स्थितो जीवो न जीवो हि नीवतिष्ठते चारस्थितो जीवो या
ति यमालयं॥ विपरीताक्षरं प्रश्ने रिक्तायां पृच्छको यदि॥ विपर्ययं च विज्ञेयं विषमस्योदये सदा॥११॥ चं
द्रस्थाने स्थितो जीवो सूर्यस्थाने तु पृच्छकः॥ तदा प्राणविमुक्तोसौ यदि वैद्यशतैर्वृतः॥१२॥ पिंगलायां स्थि
तो जीवो वामे दूतस्तु पृच्छति॥ तदापि म्रियते रोगी यदि त्राता महेश्वरः॥१३॥ एकस्य भूतस्य विपर्ययेण रो
८ गाभिभूतं भवतीह पुंसां॥ तयोर्द्वयोर्बंधुसुहृद्विपत्तिः पक्षद्वये व्यत्ययतो मृतिः स्यात्॥१४॥ इति रोगप्रक
रणं॥ अथ स्वरलक्षणं॥ मासादौ वत्सरादौ च पक्षादौ च यथाक्रमं॥ क्षयकालं परीक्षेत वायुनरवशात्सुधी
॥१५॥ पंचभूतात्मके देहे ... रक्षमेदन्यसे ... तिन तेन लोवस्थिरो न चेत॥१६॥ नाडतवध

१८ यित्वा तु सूर्यं बोधयते यदि ॥ अभ्यासाज्जीवते जीवः सूर्यः कालेऽपि वंच्यते ॥१७॥ गगनात् स्रवते चंद्रः काय
पद्मानि सिंचयेत् ॥ कर्मयोगसदाभ्यासैरमरः शशिसंश्रवात् ॥१८॥ शक्रो गंकं वारयेद्रात्रौ दिवा वायोर्दिवाकरः
॥ इत्यभ्यासरतो नित्यं स योगी नात्र संशयः ॥१९॥ अहोरात्रं यदैकत्र वहते यस्य मारुतः ॥ तदा तस्य भवेदायुः
संपूर्णं वत्सरत्रयं ॥२०॥ अहोरात्रद्वयं यस्य पिंगलायां सदा गतिः ॥ तस्य वर्षद्वयं प्रोक्तं जीवितं तत्त्ववेदिभिः ॥२१
॥ रात्रौ चंद्रो दिवा सूर्यो वहेद्यस्य निरंतरं ॥ जानीयात्तस्य वै मृत्युः परमासस्यांतरेण वै ॥२२॥ एकादिषोड
शाहानि यदि भानुर्निरंतरं ॥ वहेद्यस्य च वै मृत्युः शेषाहेन च मासिके ॥२३॥ संपूर्णं वहते सूर्यश्चंद्रमा नैव
दृश्यते ॥ पक्षेण जायते मृत्युः कालज्ञानेन भाषितं ॥२४॥ संपूर्णं वहते चंद्रः सूर्यमानैव दृश्यते ॥ मासेन जा
यते मृत्युः कालज्ञानेन भाषितं ॥२५॥ मूत्रं पुरीषं वायुश्च समकालं प्रवर्त्तते ॥ तदासौ चलितो ज्ञेयो दशा
हेन म्रियते ध्रुवं ॥२६॥ अरुंधती ध्रुवं चैव विष्णोस्त्रीणि पदानि च ॥ आयुर्हीना न पश्यंति चतुर्थं मातृमंडलं
॥२७॥ अरुंधती भवेज्जिह्वा ध्रुवो नासाग्रमेव च ॥ भ्रुवौ विष्णुपदं ज्ञेयं तारकं मातृमंडलं ॥२८॥ न च ध्रुवो स १८
प्तमो ध्ये पंचतारा त्रिनासिका जिह्वा एकदिने प्रोक्तं म्रियते मानवं ध्रुवं ॥२९॥ कोशादंगुलीभ्यां तु किंचि

द्वाहं निरीक्षयेत् ॥ यदा न दृश्यते बिंदुर्दशाहेन जयेन्मृतः ॥३०॥ अथ नाडीज्ञानं ॥ इडा गंगेति विज्ञेया पिं
गला यमुना नदी ॥ मध्ये सरस्वती विद्यात्प्रयागं संगसंगमं ॥३१॥ आदौ साधनमाख्यातं सद्यः प्रत्य
यकारकं ॥ बद्धपद्मासनो योगी बंधयेदुडियारकं ॥ पूरकः कुंभकश्चैव रेचकश्च तृतीयकः ॥ ज्ञा
तव्यो योगिभिर्नित्यं देहसंसिद्धिहेतवे ॥३३॥ पूरकः कुरुते पुष्टिं धातुसाम्यं तथैव च ॥ कुंभकः स्तंभनं
कुर्यात्तज्जीवरक्षाविवर्द्धनं ॥३४॥ रेचको हरते पापं कुर्याद्योगपदं व्रजेत् ॥ पश्चात्संग्रामवत्तिष्ठेल्ल
यबंधं च कारयेत् ॥३५॥ चंद्रं पिबति सूर्यश्च सूर्यं पिबति चंद्रमाः ॥ अन्योन्यकालभावेन जीवे
च्चंद्रार्कतारकं ॥३६॥ स्वयं गे वहते नाडी तन्नाडीरोधनं कुरु ॥ मुखबंधममुंचन्वै पवनं जायते यु
वा ॥ मुखनासाक्षिकर्णाभ्यामंगुलीभिर्निरोधयेत् ॥ तत्वोदयमिति ज्ञेयं षण्मुखीकरणं प्रिये ॥
३८॥ तस्य रूपं गतिः स्वादो मंडलं लक्षणं त्विदं ॥ यो वेत्ति मानवो लोके संसर्गादपि योगवित् ॥३९॥ नि
राशो निष्कलो योगी न किंचिदपि चिंतयेत् ॥ वासनामुन्मनीभूत्वा कालं जयति लीलया ॥४०॥
विश्वनासिकाग्रा किंचिन्न्यापरिदृश्यते ॥ न तस्यं तु मनो यस्य याममात्रं भवेदिह ॥४१॥ तस्यायु

१५ र्दितेनित्यं घटिकात्रयमानुषः॥ शिवेनोक्तं पुरा तंत्रे सिद्धसावरगह्वरे॥ ८२॥ बहुपन्नाससनस्योगुदप
वनं च सन्निरुध्याद्वि मुच्यते तस्यापानं ब्रह्मकुनवजितमनिलं प्राणनिरुद्धः॥ एकोनूतंसुषुम्णाविवरमुपगतं ब्रह्मरंध्रे च नीत्वा निक्षिप्याकाशमार्गे शिवस्मरणवतायांति ये केपि धन्याः॥ ८३॥ ए
तज्जानाति यो योगी एतत्पठति नित्यशः॥ सर्वदुःखविनिर्मुक्तो लभते वांछितं फलं॥ ८४॥ स्वरज्ञानं
शिरो यस्य लक्ष्मीपदतले भवेत्॥ एकचचारिस्य सुखं तस्य सदा भवेत्॥ ८५॥ प्रणवः सर्ववेदानां
ब्रह्माण्डे भास्करो यथा॥ मृत्युलोके तथा पुंसः स्वरज्ञानी पुमानपि॥ ८६॥ नाडीत्रयं विजानाति तत्त्वज्ञा
नं तथैव च॥ नैव तेन भवेत्तुल्यं लक्षकोटि रसायनं॥ ८७॥ एकाक्षरं प्रदातारं नाडीभेदनिवेदकं॥ पृथि
व्यां नास्ति तद्द्रव्यं यद्दत्वा चानृणो भवेत्॥ ८८॥ स्वरस्तत्वं तथा युद्धं देवि वश्यं स्त्रियं तथा॥ गर्भोद्रोगकाला
ख्यं नवप्रकरणान्वितं॥ ८९॥ एवं प्रवर्तितं लोके प्रसिद्धं सिद्धियोगिभिः॥ आचंद्रार्कग्रहं जीवात्म वतो
सिद्धिदायकं॥ ९०॥ इति श्रीशिवोमासंवादे कालनवप्रकरणान्वितं पवनविजयस्वरोदयं संपूर्णं॥ का
लज्ञानं कथायुक्तं शंभुनातत्त्वभाषितं॥ देहिनो ज्ञायते मृत्युः षड्भिः मासैर्यथागतः॥ १॥ कालस्य जाति १५

म्रतानि कालः संहरते प्रजाः॥ कालः स्वप्नेषु जागर्ति कालो हि दुरतिक्रमः॥ २॥ कालं दृष्ट्वा विनश्यंति कालेन
सुरपन्नगाः॥ नोड्गः सर्वजीवाश्च सर्वे काले विनश्यति॥ ३॥ विरंचीहरिनामध्ये च पतंति दशचतुर्दश॥ ४॥ अ
शानां च सनस्यांति सोपि काले विनश्यति॥ ५॥ मनुष्यसत जीवस्यां दिति देवेन नाषितं॥ विक्रमेणः प्रमा
वेणाची ध्रुवं चैव विनश्यति॥ मासेनैकेन षण्मासाः पक्षेनैव त्रिमासकं॥ पंचरात्रेण सप्तैव मृत्युश्चैव
च लक्षणं॥ ६॥ अनंतोयांतस्यपातं सातिकपालयेः॥ कफकंठमाप्ता तिज्जीवितं तस्य दुर्लभं॥ ७॥ रा
त्रौ दारुणो नवेयम्य देवासौ तं च जायते॥ कफपुरीत कंठस्य तस्य मृत्युर्न विषमति॥ ८॥ स्वरहीनोपुरु
षः कायाः स्वाससमाकुलः॥ जिह्वाकफसमायुक्ता कुक्षिरोगी विनश्यति॥ ९॥ स्वरो वाचासंह
रैवकृते सूर्य सोमेनैव न दृश्यते॥ पक्षेण जायते मृत्युः कालज्ञानेन भाषितं॥ १०॥ जिह्वाग्रेवा नासाग्रे
वयोर्न पश्य पश्यति॥ अनंतपं सिद्धयत्का सोमृत्युरेव न संशयः॥ ११॥ कर्णयोर्ध्वनिर्तिमनासितर्जनीर
वने सति॥ चिकुके न हि संदेहे कालस्य लक्षणं स्मृतं॥ १२॥ नवसुवन सप्त कर्णपंच च चक्षुस्त्रिना
सिका॥ जीव्हानासान दृश्यंते मृत्युरेव न संशयः॥ १३॥ शीतलं पाणिपादं च धारीतन्मेना सिमं

१६ तं॥ शिरस्तापो भवेद्यस्य तस्य मृत्युर्भविष्यति॥१४॥ गंधस्तु न्यं भवेन्नासा जिह्वा च रसवर्जिता कं
पयेत्समहामेरुघटिकामात्रं तिष्ठति॥१५॥ करसंस्थापयेद्भूमौ मध्यमा च निरोधयन्॥ या
म मात्रं भवेन्मृत्युः पर्यंतिष्ठति नासिका॥१६॥ वायुर्न्नीतलमाप्नोति अंगकंपयते सदा॥ वरी
देहं वदा देहकालः मंनिधिरक्षति॥१७॥ लोहदंडं दूरकुर्सं स्वप्नेषु पश्यंति ये नराः॥ समाधिस्थे
नायदृष्टं अष्टमासं न जीवति॥१८॥ अधुना हृत्पते चिन्हं कालस्य लक्षणं ध्रुवं॥ निरान्नाने
सम्यक् कृते यो नाडिनांतरं॥१९॥ रात्रौ शुक्लपक्षे च छायापुरुषं निरीक्षते॥ छायाकं वेन्यस्तदृष्टमेकदृष्टि
शितास्तु नः॥२०॥ सन्मुखं गगने पश्यन् छायापुरुषमद्भुतं॥ शुद्धस्फटिकसंकाशं पातलं दृष्टिसमाग
तो॥२१॥ तस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते॥ संपूर्णलक्षणं यातां यदा पश्यति निर्मलं॥२२॥ तदान
विद्यते कालं पातस्य वत्सरे ध्रुवं॥ संपूर्णं च यदा पश्यं तस्य मृत्युः करोति किं॥२३॥ निर्मलं वर्णं यदा छा
या अल्पमृत्युः प्रजायते॥ पीतवर्णं यदा छाया व्याधिस्पंतदा भवेत्॥२४॥ रक्तवर्णं यदा छाया तस्य यदि वि १६
नश्यति॥॥ श्यामवर्णं यदा छाया तस्य मृत्युर्भविष्यति॥२५॥ शिरहीनं यदा छाया परमासेन त्रगाः॥

१७ तं॥ छाया तिनं यदा दृष्ट्वा मृत्युरेव न संशयः॥२६॥ लसहीनं यदा दृष्ट्वा स्यात् मृत्युक्षावन संशयः॥ मध्याह्ने सं
हरतौ दुर्लिक्षं च न्य वेदनं॥२७॥ पापी वामभेन्नपक्षस्य मानेहि नुत्तुस्त्रियं॥२८॥ गविचं ब्रह्ममंडलं तस्य ध्यात
स्सूर्यस्य मंडलं॥ शुचि मध्ये स्थितो हंसः सहस्रचक्रैः फलां॥२९॥ पंरा भवंति आवर्त्त सहस्र
ध्यानसमन्वितं॥ तत्र ध्यानेन कर्त्तव्यं कालवचनमाप्नुयात्॥३०॥ इति ईश्वरनारदसंवादे कालप
रीक्षासंपूर्णं॥ ॥श्रीरामायनमः॥ ॥श्रीनारायणायनमः॥ ॥श्रीकृष्णायनमः॥ ॥ १७